Roll No. : ......................................

Total No. of Questions : **12** ] [ Total No. of Printed Pages : **4**

# APF–2040

## M.A. (Final) Examination, 2022

## SANSKRIT

## (वर्ग 'आ'—वैदिक साहित्य)

Paper - VIII

## (ब्राह्मण, उपनिषद् तथा वैदिक सहायक ग्रन्थ)

*Time : **3** Hours* ] [ *Maximum Marks : **100***

**(खण्ड–अ)** **(अंक : 2 × 10 = 20)**

**नोट** :– सभी **दस** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **50** शब्द)। प्रत्येक प्रश्न **2** अंक का है।

**(खण्ड–ब)** **(अंक : 8 × 5 = 40)**

**नोट** :– सात में से किन्हीं **पाँच** प्रश्नों के उत्तर दीजिए। (उत्तर-सीमा **200** शब्द)। प्रत्येक प्रश्न **8** अंक का है।

**(खण्ड–स)** **(अंक : 20 × 2 = 40)**

**नोट** :– चार में से किन्हीं **दो** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **500** शब्द)। प्रत्येक प्रश्न **20** अंक का है।

**खण्ड–अ**

1. सर्वे प्रश्नाः अनिवार्याः। शब्द-सीमा **50** शब्दाः। द्वौ संस्कृतेन लिखत—

   (i) सप्तदशो वै प्रजापतिः। इति ऐतरेयब्राह्मणोक्तिरियं प्रतिपादनीया।

   (ii) 'पाङ्क्तो वै यज्ञः' कथनं समीक्षताम्।

(iii) सत्यं चैवानृतं च। सत्यमेवदेवाः अनृतं मनुष्याः—कथनस्य व्याख्या कार्या।

(iv) अथ निष्पुनाति शतपथ ब्राह्मणकथनमिदं प्रतिपादनीयम्।

(v) तिस्र एव देवता इति नैरुक्ताः' निरुक्तानुसारेण विवेचयत।

(vi) 'वरुणो वृणोतीति सतः' संस्कृते विवचनं कुरुत।

(vii) 'तावदवग्रहान्तरम्'—इत्यस्य व्याख्या विधेया।

(viii) समानाक्षरे सस्थाने दीर्घमेकमुभे स्वरम्।

(ix) छान्दोग्य मते 'अङ्गिरा प्राणः' विवेचनीयः।

(x) 'शौवः उद्गीथः' इत्यस्याभिप्रायः कः ? विवेचनीयः।

**खण्ड–ब**

**नोट** :– अधोलिखितेषु **पञ्च** प्रश्नाः समाधेयाः। प्रश्न संख्या 4, 5 अनिवार्याः सन्ति (शब्द सीमा **200** शब्दाः)—

2. अधोलिखितस्य सप्रसङ्ग व्याख्या विधेया—

ॐ अग्निर्वै देवानामवमो विष्णुपरमस्तदन्तरेण सर्वा अन्या देवताः।

आग्नावैष्णवं पुरोडाशं निर्वपन्ति दीक्षणीयमेकादश कपालम्।

**अथवा**

आज्यं वै देवानां, सुरभि घृतं मनुष्याणां, आयुतं वितृणां नवनीतं गर्भाणां तद्यन्नवनीतेनाम्यञ्जन्ति स्वेनैवेनं तद्भागधेयेन समर्धयन्ति।

3. 'पवित्रे करोति' इत्यस्य कर्मस्य स्वरूपं प्रतिपादयत।

**अथवा**

'अप प्रणयनम्' कर्म प्रतिपादयत।

4. अधोलिखित गद्यांशस्य व्याख्या संस्कृतमाध्यमेन विधेया—

भूमा वाऽअनः भूमाहि वाऽअनस्तस्माद्यदा बहुभवति अनोवाह्यम भूदित्याहुस्तद्भूमानमेवैतदुपैति तस्मादनस एव गृहणीयात्।

5. अधोलिखितेषु चतुर्ण्णां पदानां निर्वचनानि संस्कृतमाध्यमेन कुरुत—

(क) उष्णिक्

(ख) विराट्

(ग) अग्निः

(घ) जातवेदः

(ङ) इन्द्रः

(च) पर्जन्यः

(छ) मित्रः

(ज) शिशुः

6. यास्कमते पृथ्वीस्थानीय देवतानां सविस्तरं विवेचना कार्या।

**अथवा**

निरुक्तानुसारेण रुद्रदेवतास्वरूपं विवेचयत।

7. अधोलिखितेषु सूत्रेषु चतुर्णां सोदाहरणं व्याख्या कार्या—

(क) अनुस्वारं व्यञ्जनं वा स्वरो वा

(ख) स्वरान्तरे व्यञ्जनान्युत्तरस्य

(ग) ओंकार आमन्त्रितजः प्रगृह्यः

(घ) ऋकारादयो दश नामिनः स्वराः

(ङ) स्वरान्तरं तु विवृतिः

(च) औकारं युग्मयोः

(छ) ह्रस्वपूर्वस्तु सोऽकारम्।

(ज) त उद्ग्राहाः।

8. 'प्रणवः' इत्यस्य भेदसहितं विवेचनं कुरुत।

**खण्ड–स**

**नोट** :– निम्नांकितेषु **द्वौ** प्रश्नौ समाधेयौ। (शब्द सीमा **500** शब्दाः)—

9. कयोश्चित **द्वयोः** ससन्दर्भ व्याख्या विधेया—

(क) अग्निर्वै सर्वा देवता विष्णु सर्वा देवताः। एते वै यज्ञस्यान्त्ये तन्वौ यदग्निश्च विष्णुश्च तद्यदाग्नावैष्णवं पुरोडाशं निर्वपन्त्यत एवतद्वेवानृघ्नुवन्ति। तद्यद्घृतं तत्स्त्रियं पयः, ये तण्डुलास्ते पुंसस्तन् मिथुनं, मिथुनेवैनैनं तत्प्रजया पशुभिः प्रजनयति प्रजात्यै।

(ख) यज्ञो वै देवेभ्य उदकामत्। तमिष्टिभिः प्रैषमैच्छन्। तमिष्टिभिः प्रैषेच्छंसृदिष्टि नामिष्टित्वम्। तमन्वविन्दन्, अनुवित्त यज्ञो राघ्नोति य एवं वेद।

(ग) पुनर्वा एतमृत्विजो गर्भं कुर्वन्ति यं दीक्षयन्ति।। अद्भिरमिषिञ्चन्ति। रेतो वा आपः। सरेतसं एवैनं तत् कृत्वा दीक्षयन्ति।

(घ) अनुष्टुभौ स्वर्गकामः कुर्वीत। द्वयोर्वा अनुष्टुमोश्चतुष्षष्टिरक्षराणि। त्रय इम ऊर्ध्वा एकविंशा लोकाः। एकविंशत्यैकविंशव्यैवेमाँल्लोकान् रोहति।

10. अधोलिखितेषु **द्वयोः** अवतरणयोः ससन्दर्भ टिप्पणश्च व्याख्या विधेया—

(क) स आहवनीयागारे वैतां रात्रिं शयीत। गार्हपत्यागारे वा देवान्वा एष उपावर्तते यो व्रतमुपैति स यानेवोपावर्तते तेषामेवैतन्मध्ये शेतेऽघः शयीताधस्रादिव हि श्रेयस उपचारः।

(ख) अथाभिमृशति। भूताय त्वा नारातयऽइति। तद्यत एव गृह्णाति तदेवैतत्पुनराप्याययति।

(ग) अथानुमन्त्रयते। देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वछिद्रेण पाणिना सुप्रतिगृहीता असन्नित्यथ त्रिफलीकरोति त्रिवृद्धियज्ञः।

(घ) युष्मा इन्द्रोऽवृणीत वत्रतूर्यऽइति। एता उ हीन्द्रोऽवृणीत वृत्रेण स्पर्धमान एतामिर्ह्येनमहंस्तस्मादाह यूष्मा इन्द्रोऽवृणीत व्रत्रतूर्थ इति।

11. अधोलिखितस्य व्याख्या विधेया—

'अथाकारचिन्तनं देवतानाम्'।

**अथवा**

अथातो मध्यस्थना देवताः तासां वायुः प्रथमागामी भवति।

12. ऋक्प्रातिशाख्यग्रन्थस्य द्वितीयपटलस्य विषयान् प्रतिपादयतं।

**अथवा**

'परमःपराध्र्योऽष्टमो यदुद्गीथः' इति उद्गीथस्य भेदोपभेद सहिता व्याख्या कार्या।